# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय २

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
कुम्भयोनिर्महातेजा वाक्यमेतदुवाच ह ॥ १॥

शृणु राजन्यथावृत्तं यस्य तेजोबलं महत् ।
जघान च रिपून्युद्धे यथावध्यश्च शत्रुभिः ॥ २॥

अहं ते रावणस्येदं कुलं जन्म च राघव ।
वरप्रदानं च तथा तस्मै दत्तं ब्रवीमि ते ॥ ३॥

पुरा कृतयुगे राम प्रजापतिसुतः प्रभुः ।
पुलस्त्यो नाम ब्रह्मर्षिः साक्षादिव पितामहः ॥ ४॥

नानुकीर्त्या गुणास्तस्य धर्मतः शीलतस्तथा ।
प्रजापतेः पुत्र इति वक्तुं शक्यं हि नामतः ॥ ५॥

स तु धर्मप्रसङ्गेन मेरोः पार्श्वे महागिरेः ।
तृणबिन्द्वाश्रमं गत्वा न्यवसन्मुनिपुङ्गवः ॥ ६॥

तपस्तेपे स धर्मात्मा स्वाध्यायनियतेन्द्रियः ।
गत्वाश्रमपदं तस्य विघ्नं कुर्वन्ति कन्यकाः ॥ ७॥

देवपन्नगकन्याश्च राजर्षितनयाश्च याः ।
क्रीडन्त्योऽप्सरसश्चैव तं देशमुपपेदिरे ॥ ८॥

सर्वर्तुषूपभोग्यत्वाद्रम्यत्वात्काननस्य च ।
नित्यशस्तास्तु तं देशं गत्वा क्रीडन्ति कन्यकाः ॥ ९॥

अथ रुष्टो महातेजा व्याजहार महामुनिः ।
या मे दर्शनमागच्छेत्सा गर्भं धारयिष्यति ॥ १०॥

तास्तु सर्वाः प्रतिगताः श्रुत्वा वाक्यं महात्मनः ।
ब्रह्मशापभयाद्भीतास्तं देशं नोपचक्रमुः ॥ ११॥

तृणबिन्दोस्तु राजर्षेस्तनया न शृणोति तत् ।
गत्वाश्रमपदं तस्य विचचार सुनिर्भया ॥ १२॥

तस्मिन्नेव तु काले स प्रजापत्यो महानृषिः ।
स्वाध्यायमकरोत्तत्र तपसा द्योतितप्रभः ॥ १३॥

सा तु वेदध्वनिं श्रुत्वा दृष्ट्वा चैव तपोधनम् ।
अभवत्पाण्डुदेहा सा सुव्यञ्जितशरीरजा ॥ १४॥

दृष्ट्वा परमसंविग्ना सा तु तद्रूपमात्मनः ।
इदं मे किं न्विति ज्ञात्वा पितुर्गत्वाग्रतः स्थिताः ॥ १५॥

तां तु दृष्ट्वा तथा भूतां तृणबिन्दुरथाब्रवीत् ।
किं तमेतत्त्वसदृशं धारयस्यात्मनो वपुः ॥ १६॥

सा तु कृत्वाञ्जलिं दीना कन्योवाच तपोधनम् ।
न जाने कारणं तात येन मे रूपमीदृशम् ॥ १७॥

किं तु पूर्वं गतास्म्येका महर्षेर्भावितात्मनः ।
पुलस्त्यस्याश्रमं दिव्यमन्वेष्टुं स्वसखीजनम् ॥ १८॥

न च पश्याम्यहं तत्र कां चिदप्यागतां सखीम् ।
रूपस्य तु विपर्यासं दृष्ट्वा चाहमिहागता ॥ १९॥

तृणबिन्दुस्तु राजर्षिस्तपसा द्योतितप्रभः ।
ध्यानं विवेश तच्चापि अपश्यदृषिकर्मजम् ॥ २०॥

स तु विज्ञाय तं शापं महर्षेर्भावितात्मनः ।
गृहीत्वा तनयां गत्वा पुलस्त्यमिदमब्रवीत् ॥ २१॥

भगमंस्तनयां मे त्वं गुणैः स्वैरेव भूषिताम् ।
भिक्षां प्रतिगृहाणेमां महर्षे स्वयमुद्यताम् ॥ २२॥

तपश्चरणयुक्तस्य श्राम्यमाणेन्द्रियस्य ते ।
शुश्रूषा तत्परा नित्यं भविष्यति न संशयः ॥ २३॥

तं ब्रुवाणं तु तद्वाक्यं राजर्षिं धार्मिकं तदा ।
जिघृक्षुरब्रवीत्कन्यां बाढमित्येव स द्विजः ॥ २४॥

दत्त्वा तु स गतो राजा स्वमाश्रमपदं तदा ।
सापि तत्रावसत्कन्या तोषयन्ती पतिं गुणैः ।
प्रीतः स तु महातेजा वाक्यमेतदुवाच ह ॥ २५॥

परितुष्टोऽस्मि भद्रं ते गुणानां सम्पदा भृशम् ।
तस्मात्ते विरमाम्यद्य पुत्रमात्मसमं गुणैः ।
उभयोर्वंशकर्तारं पौलस्त्य इति विश्रुतम् ॥ २६ ॥

यस्मात्तु विश्रुतो वेदस्त्वयेहाभ्यस्यतो मम ।
तस्मात्स विश्रवा नाम भविष्यति न संशयः ॥ २७ ॥

एवमुक्ता तु सा कन्या प्रहृष्टेनान्तरात्मना ।
अचिरेणैव कालेन सूता विश्रवसं सुतम् ॥ २८ ॥

स तु लोकत्रये ख्यातः शौचधर्मसमन्वितः ।
पितेव तपसा युक्तो विश्रवा मुनिपुङ्गवः ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com